**International Journal of Advanced Research and Development**
**ISSN: 2455-4030**
**Impact Factor: RJIF 5.24**
**www.advancedjournal.com**
**Volume 2; Issue 5; September 2017; Page No. 813-815**

# वैदिकवाङ्मयेऽध्यात्मचिन्तम्

**मुकुल देवः**
शोधच्छात्र, श्री ला.ब.शा.रा.स.वि, नई दिल्ली, भारत।

**प्रस्तावना**

अस्मिन् संसारे सर्वे मानवाः सुखावाप्तये स्वज्ञानानुरूपमेव प्रयतन्ते। सुखञ्च शरीरेन्द्रियात्मादिभेदेने बहुविधम्। नैकभेदभिन्नेऽप्यस्मिन् सुख ऐन्द्रियं सुखं विज्ञानजनितोपायभूतोपकरणैर्मानवेभ्य इदानीमतिसुलभम्। मानसं सुखं रसिकजनेभ्यः काव्यकलाकलापालाप-शिल्पादीनां माध्यमेनाशु समासाद्यते। परम् अतोऽतिरिक्तमात्मा- नन्दरूपं यद् विशिष्टं सुखं तत्तु योगिभिरेव 'अध्यात्मज्ञानयोग- यागेनैवानुभूयते'। एतस्य खल्वाध्यात्मयोगरूपयागस्योत्त्थानिकाऽध्यात्म- ज्ञानदर्शननैव विनिर्मीयत इति विदुषामारावः। दर्शनं हि 'दृश्यत इति दर्शनम्' इति व्युत्पत्त्या ''आत्मा वा अरे द्रष्टव्यश्श्रोतव्यो मन्तव्यो निदिध्यासितव्यः''[1] इति श्रुतिस्वारस्येन यथार्थानुभवत्वमुपैति।

एतस्य खलु दर्शनस्यारम्भणमृग्वेदस्य नासदीयसूक्ताद्[2] भवति यत्र चोच्यते- ''को अद्धा वेद क इह प्रावोचत् कुत इयं विसृष्टिः।''[3] इत्थम्भूतैर्विविधविध- जिज्ञासाघातप्रघातैर्जीवात्माऽऽहन्यमानो दर्शनसरणीषु शनैश्शनैस्सरीसर्त्तीति तत्त्वविदां समेषां सम्मतं मतम्। तदेवमयं जिज्ञासुरनुसन्धाता दर्शनस्यालोके स्वजीवनस्योद्देश्यं कर्त्तव्यञ्च निश्चिनुते। तत्र यद्धि किञ्चिद्विज्ञान विवेचयति तदेवाहत्याहत्यासौ स्वं दर्शनमुपसंहरति हरति च सततमिन्द्रियहरिणहारिणीमुपभोगमृगतृष्णाम्। एतस्य सर्वाणि दर्शनानि वेदमूलकानीति विरौति बहुधा वेदज्ञनिकरः।[4] तदेवं भारतीयदर्शनशास्त्रस्य सर्वाणि प्रस्थानानि वैदिकवाङ्मयरूपोपजीव्यस्योपजीवितानि। सर्वाणि दर्शनस्रोतांसि वेदार्थचिन्तनसन्तानवितानाधिकरणमध्युष्यैव प्रवहन्ति। तत्र हि त्रीणि तत्त्वान्यनादिरूपेण निरूपितानि, तानि चेमानि-ईश्वरो जीवः प्रकृतिश्चेति। तथा चोक्तमृग्वेदे-

> द्वा सुपर्णा सयुजा सखायः समानं वृक्षं परिषस्वजाते।
> तयोरन्यः पिप्पलं स्वाद्वन्त्यनश्नन्नन्योऽभिचाकशीति।।[5]

अत्र वृक्षो हि 'प्रकृतिः' सत्त्वरजस्तमसां साम्यावस्था[6] रूपिणी, फलानां भोक्ता प्रथमः सुपर्णो जीवात्मा, द्रष्टा साक्षिरूपो द्वितीयः सुपर्णः 'क्लेशकर्मविपाकाश- यैरपरामृष्टः पुरूष विशेष ईश्वरः'[7] परमात्मेति मतस्थितिः। ऋग्वेदो हि जगतः परमं कारणरूपममृतमृतं शाश्वतिकसत्यत्वेन प्रत्यपीपदत्।[8] एतद्धि तस्यैव परमात्मनोऽभी- द्धात्तपसोऽध्यजायत।[9] अत्रेदमवधेयम्-ज्ञानाधिकरणमात्मरूपजीवा बहवो भवन्ति, परमात्मा त्वेक एवेति।[10]

अयमेक एवात्मा विप्रैः इन्द्रादिनानासंज्ञाभिरुपदिष्टः।

तद्यथा-

> इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्।
> एकं सद् विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः।।[11]

अयमेवैकोदेवः हिरण्यगर्भः[12], आत्मदा-बलदा[13], प्रजापतिः[14] सत्यधर्मा[15] प्रभृतिभिर्विशेषणैराहूयते। अस्येव छाया=आश्रय एवामृतत्त्वस्य मोक्षस्य हेतुरनाश्रयश्च पुनं पुना मरणस्येति। तस्माद् धीरा उभे त्यक्त्वाऽशनाया पिपासे सदैवामुमेवोपासते। जातवेदस्त्वेनायं देवो यशसेऽमृतत्त्वाय चोपास्यत उपासकैः। तद्यथा-ऋग्वेदसंहिताया अयं मन्त्रोऽवलोकनीयः- ''जातवेदो यशो अस्मासु धेहि प्रजाभिरग्ने अमृतत्त्वमश्याम।''[16] निरुक्तकृत्तत्रभवान् यास्काचार्योऽपि ''माहाभाग्यात् देवताया एक एवात्मा बहुधा स्तूयते।[17] एकस्यात्मनोऽन्ये देवाः प्रत्यङ्गानि भवन्ती''[18] ति विलिख्यै तमेवात्मानं भृश प्रतुष्टाव। अथर्ववेदसंहितायां सुस्पष्टमुल्लिखितं यो ह्यत्मानं वेद स एव परमात्मानं वेत्ति नेतरे। तथा हि- ''ये पुरुषाः ब्रह्मविदुस्ते विदुः परमेष्ठिनं ये विदुः परमेष्ठिनं यश्च वेद प्रजापतिम्। ज्येष्ठाः ये विदुः... स्कम्भमनुसंविदुः।''[19] अस्मादध्येतव्या वेदा सदैव विप्रैः। यो हि वेदमनधीत्य द्विजोऽन्यशास्त्राणि पठति सः सान्वयं शूद्रत्वं प्राप्नोतीति[20] ब्रुवाणो मनुरप्येनमेव ब्रह्मरूपं देवं समुपासनीयं प्रत्यपपद्यत। महावैयाकरणो भर्तृहरिरपि 'आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः'[21] ''प्राप्त्युपायोऽनुकारश्च तस्य वेदो महर्षिभिः''[22] इत्येवं व्याहृत्य महता देवेन नः साम्यसम्पादनाय परामम्शी।[23] तत्र भवान् भगवान्- याज्ञवल्क्योऽपि शतपथे सुस्पष्टमुवाच-''यो वेदान् अधीते स अमृतत्वमश्नुते ब्रह्मणा सहैकत्वञ्चाधिगच्छति। मृत्योरनन्तरं मोक्षलाभं लब्ध्वा जीवनस्य परमं चरमञ्चोद्देश्यमाप्य कृतकृत्यतामुपैति।[24] सर्वे ब्राह्मणग्रन्थाश्श्रौतगृहधर्मशुल्वसूत्राणि, श्रौतस्मार्त्तकर्मकाण्डप्रतिपादनपरा यज्ञविज्ञान- रहस्यसम्भृताः ग्रन्थाश्च तमेवैकं परमात्मानं श्रौतव्यं मननीयं च प्रतिपादयन्ति। औपनिषदृषयस्तु निर्भ्रान्तया सुस्पष्ट निजगदुः- ''एतदालम्बनं श्रेष्ठमेतदालम्बनं परम्। एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयेते।''[25] ''प्रणवो धनुः शरो ह्येष आत्मा, ब्रह्म तॅल्लक्ष्यमुच्यते।

अप्रमत्तेन वेद्धव्यं शरवत्तन्मयोभवेत्''।[26] आरण्यसाहित्यमप्यत्रातितरां साहाय्यमाहार्यमाहरति प्रामुख्येन च 'प्राणाविद्यां' साटोपं प्रदर्श्याध्यात्मशिखरमारुह्य रोरवीति- सर्वं हीदं प्राणेनावृत्तमिति। तथा हि- ''सोऽयमाकाशः प्राणेन बृहत्या विष्टब्धानीत्येव विद्यात्।''[27] तत्रैवेदमपि प्राप्यत उल्लेखः- ''सर्वा ऋचः सर्वे वेदाः सर्वे घोषा एकैव व्याहृतिः। प्राण एव प्राण ऋच इत्येवं विद्यात्।''[28] अथर्ववेदे जीवात्मनो ब्रह्मणश्च सम्यग् विवेचनं दृक्पथमधितिष्ठति। तत्र हि तस्मादेव ब्रह्मणा स्कम्भाद्वा तपः ऋतं, व्रतं, श्रद्धा, सत्यं, वायुः, चन्द्रमा, भूमिरन्तरिक्षं द्यौश्च प्रवर्त्तितम्। ब्रह्मण्यस्मिन् सदसतावन्तस्स्याताम्। अजैवाभरता मरणशीलतां वा वर्त्तते। स एवात्मा शरीरे निवसतीत्यपि तत्रैव व्याख्यातम्। तद्यथा-

पुण्डरीकं नवद्वारं त्रिभिर्गुणेभिरावृतम्।
तस्मिन् यद् यक्षमात्मन्वत् तद्वै ब्रह्मविदो विदुः।।[29]

निष्कामकर्मयोगस्याद्या प्रतिष्ठा वेदेष्वेव विद्यते।[30] वेदान्तस्तु ब्रह्मविद्याया आकर एव। तत्र ऋषिभिः स्पष्टमुद्घोषितम्- ''सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद् वदन्ति। यदिच्छन्तो ब्रह्मचर्यं चरन्ति, तत्ते पदं संग्रहेण ब्रवीम्योमित्येतद्।''[31] अस्यावाप्तिसाधनमपि तत्रैवाति मोहकतया प्रदर्शितम्। तद्यथा-

''नाविरतो दुश्चरितान्नाशान्तो नासमाहितः।
नाशान्तमानसो वाऽपि प्रज्ञानेनैनमाप्नुयात्।।''[32]

अत एव- ''यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते।।[33]

एवमेव दर्शनशास्त्रेऽपि 'जन्माद्यस्य यतः'[34] 'अथ त्रिविधदुःखात्यन्त-निवृत्तिरत्यन्तपुरुषार्थः'[35] 'यतोऽभ्युदयनिःश्रेयस सिद्धि स धर्मः'[36] इत्यादिसूत्रैः तस्यैव वेदप्रतिपाद्यस्याध्यात्मस्यातिमनोरमं वर्णनं मिलति। अन्ततस्तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेति[37] श्रुतिरध्यात्मप्रतिष्ठां परांकोटिकीं काष्ठामुपनयतीति वदन्ति वेदविज्ञानविचक्षणाः।

औपनिषत्कालान्तरमेव द्वे सृती दर्शनस्य दिशामदीदृशताम्, ते चेमे वैदिकी प्रथमा द्वितीया चावैदिकीति। अनयोरेवास्तिकं नास्तिकं च दर्शनमित्यपराभिख्याऽस्ति। प्रथमायां तावद् वैदिक्यां सरण्या 'न्याय-वैशेषिक, सांख्य-योग, मीमांसा-वेदान्ताख्यया विख्यातानि षड्दर्शनानि द्वितीयायां च चारूचारवाक्- जैनार्हतबौद्धानि वेदाप्रामाण्यमङ्गीकुर्वन्ति दर्शनानि समाम्नायन्ते। परमिदं तु सर्वस्वीकार्यं तथ्यं यदिमान्युभयविधानि दर्शनानि आहत्य समवेततया आत्मानं=शरीरं, जीवात्मानञ्चाधिकृत्यात्युपयोगिवर्त्मवितानमातन्वन्ति। भिन्नेष्वप्येतेषु विद्यते काचिद् विलक्षणैक सूत्रतेति महच्चित्रम्। इत्थमिमान्युभयविधानि दर्शनानि परस्परं पूरकानि, कानिचिच्च प्रत्यक्षतया कानिचिच्च परम्परया वेदवीथिकामेवानुसरन्तीवाभान्ति।[38] 'शरीरमाद्यं खलुधर्मसाधनम्'[39] इति कालिदासीयभणितिमनुसृत्य कानिचिद् दैहिकीमितराणि चात्मिकीमुन्नतिं दिशन्ति। समेषामेकमेव लक्ष्यं तच्च भोगापवर्गसंसिद्धिरूपमेवेति।[40] सर्वाणि दर्शनानि दुःखस्य मूलमविद्यामेव मन्वते सङ्गिरन्ति च 'ज्ञानान्मुक्तिः'[41] इति। मल-विक्षेपावरणरूपान्तःकरणस्यावरणं विच्छिद्यैव 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे''[42], दृश्यते चासौ परावरं ब्रह्म सूक्ष्मातिसूक्ष्मबुद्धिभिरिति निश्चप्रचम्।[43] सर्वमिदं वैदिकं रहस्यजातमक्षिलक्ष्यीकृत्योवाच भगवान् वेदव्यासः-

आत्मानदी संयमपुण्यतीर्था
सत्योदका शीलतटा दयोर्मिः।
तत्राभिषेकं कुरु पाण्डुपुत्र,
न वारिणा शुद्धयति चान्तरात्मा।[44]

अत एवायं निर्घोषः सुधिजनमुखात् सहषैव निर्गच्छति 'यदिहास्ति तत्सर्वत्र यन्नेहास्ति न तत् क्वचिदिति[45] तत्त्वानुसन्धित्सुभिः सुधीभिरवश्यमेव वैदिक-वाङ्मयस्याद्योपान्तं करणीयमध्ययनम्। तैर्न कदापि विस्मर्तव्यं 'स्वाध्यायोऽध्येतव्यः' इति सन्मतिरास्थेया सर्वथैवेति विरमामहे।

**संदर्भ**


1. बृहदारण्यकोपनिषद् अ.2 ब्रा.5
2. ऋग्वेद संहिता 10/129
3. तत्रैव- 10/129/6
4. द्र. दर्शनतत्त्वविवेकः भाग-1 भूमिका, ले. आचार्य वैद्यनाथः शास्त्री
5. मुण्डकोपनिषद्- 3/1/1
6. योगदर्शनम्, समाधिपादः सूत्रम्-24
7. सांख्यदर्शनम्-1/26
8. द्र० ऋग्वेदसंहिता- 10/190/1
9. द्र० तर्कसंग्रहः-आत्मनो लक्षणम्, ले. अन्नंभट्टः।
10. द्र० ऋग्वेदसंहिता- 10/190/1
11. तत्रैव- 1/164/46
12. यजुर्वेद संहिता- 13/4
13. तत्रैव-25/13
14. ऋग्वेदसंहिता-10/121/10
15. द्र० वैदिकज्योतिः पृष्ठ 201, ले० आचार्य वैद्यनाथः शास्त्री
16. द्र० ऋग्वेदसंहिता-10/121/11
17. यास्कीयं निरूक्तम्- 7/4/8
18. तत्रैव- 7/4/9
19. अर्थर्ववेदसंहिता- 10/7/17
20. मनुस्मृतिः 2/168
21. वाक्यपदीयम् ब्रह्मकाण्डम्-कारिका-11
22. तत्रैव कारिका-5
23. तत्रैव कारिका-132
24. शतपथब्राह्मणः- 10/4/130

25. कठोपनिषद्- 2/17
26. मुण्डकोपनिषद्- 2/2/4
27. ऐतरेय आरण्यक- 2/1/6
28. तत्रैव- 2/2/10
29. अर्थर्ववेद: 10/4/43
30. द्र० यजुर्वेद: 40/2
31. कठोपनिषद्-2/15
32. तत्रैव- 2/24
33. तत्रैव- 6/14
34. उ० मीमांसादर्शनम्- 1/1/2
35. सांख्यदर्शनम्- 1/1
36. वैशेषिकदर्शनम्- 1/1/2
37. शुक्लयजुर्वेद:- 31/18
38. द्र० दर्शनतत्त्वविवेक: भाग-1 भूमिका, ले. आचार्य वैद्यनाथ: शास्त्री
39. कुमारसम्भवम्- सर्ग: पञ्चम:
40. द्र० योगदर्शनम्- 2/18
41. सांख्यादर्शनम्- 3/23
42. मुण्डकोपनिषद्- 2/2/4
43. महाभारत
44. तत्रैव
45. तत्रैव।